**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Volume - 5, Issue - 1, JAN - 2022 Publication Date: 31/01/2022

DOIs:10.2018/SS/202201004 --:-- Research Article

# संस्कृत काव्यतत्त्वे रीति-प्रस्थानम्

**संजय: ज्योति:**
कलेज-शिक्षक:, संस्कृत-बिभाग:, गुसकरा महाबिद्यालय:
Email - sanjoy.jyoti@gmail.com

**संक्षिप्तासार: -** इतिहास-पुराणानामिब अलंकार-शास्त्रस्य उद्भबकाल: अपि अतीब-प्राचीनम्। सूदूर्बैदिक्युगात् अलंकार-शास्त्रस्य कबित्ब-भाबनया भारतीय-काव्यशास्त्रस्य कीर्ति: अद्याबधि: समुज्बलबान्। काव्यशास्त्रस्य केन उपादानेन काव्यस्य शब्द्: अर्थश्चेति मध्ये चमत्कार: उतपद्यते? अनया भाबनया आलंकारिकानाम् मध्ये प्रस्थानस्य उद्भब: सञ्जात:।तेषु प्रस्थानेषु महामुनिना भरतेन कृतम् रस-प्रस्थानम् सर्बाग्रे उल्लिखितम्। अनन्तरं भामहेन कृतम् अलंकार-प्रस्थानम्, बामनेन् कृतम् रीति-प्रस्थानम् प्रमुखानि उल्लेखयोग्यानि। समालोचकेषु सर्बसाकुल्ये अलंकारशास्त्रे सप्त-प्रस्थानि उपलभ्यन्ते। एषु प्रस्थानेषु रीति-प्रस्थानम् अलंकार-शास्त्रे गुरुत्बपूर्ण-स्थानम् अधिकृतम्। रीति: श्ब्दस्य ब्युतपत्तिग्त्: अर्थ: '**रियन्ते परम्परया गछन्ति अनया इति रीति:'।** 'रीङ गतौ' बा 'रीङ स्रबणे' धातौ क्तिन् प्रत्ययेन योगेन बैदर्भी आदि मार्गस्य अर्थ: निष्पद्यते। बलदेबाचार्य-उपध्यायेन मतम् यत् रीङ+क्तिन्=रीति:।अथ रीति: शब्द्स्य् अर्थ: मार्ग:। बुत्पत्तिगतार्थेन माध्यमेन् काव्यशास्त्रीयानाम् मार्गस्य सम्बन्धित: चतुर्बिभाग: कृतम्। यथा,

**प्रथमत: प्रदेशेन् बिभाजितम् काब्यमार्गम्**--- अस्मिन् मार्गे बिचरणकारी-आलंकारिका: यथा भरतमुनि-दण्डी-राजशेखर-भोजराजश्चेति।

**द्वितीयत: रचनाशैली अर्थात् काब्यतत्बेन बिभाजितम् काब्यमार्गम्**—अस्मिन् मार्गे बिचरणकारी-अलंकारिका: यथा भामह-अग्निपुराणकार-रुद्रटश्चेति।

**तृतीयत: कबिस्बभाबेन आधारितम् काब्यमार्गम्**—अस्मिन् मार्गे कुन्तकेन रचितम् मार्गम् प्रसङ्गपूर्णम् (कुन्तकेन कृतम् त्रीनि मार्गानि यथा सुकुमार-बैचित्र-मध्यमस्चेति)।

**चतुर्थत: काब्यचिन्तनेन आधारितम् काब्यमार्गम्**-अस्मिन् मार्गे बिचरणकारी-आलंकारिकारिकेष् बामनेन कृतम् बामनीय मार्गम-उद्भटेन कृतम् उद्भटीयमार्गम् तथा आनन्दबर्धेन कृतम् मार्गम् बिशेष-उल्लेखयोग्यम्।

**मूलशब्द:** रीति:, प्रस्थानम्, मार्ग्:, काब्यमार्ग्:, प्रबृत्ति ।

## 1. भूमिका:-

इतिहास-पुराणानामिब अलंकार-शास्त्रस्य उद्भबकाल: अपि अतीब-प्राचीनम्। सूदूर्बैदिक्युगात् अलंकार-शास्त्रस्य कबित्ब-भाबनया भारतीय-काव्यशास्त्रस्य कीर्ति: अद्याबधि: समुज्बलबान्। काव्यशास्त्रस्य केन उपादानेन कारणेन काव्यस्य शब्द्: अर्थश्चेति चमत्कार: उतपद्यते? अनया भाबनया आलंकारिकानाम् मध्ये प्रस्थानस्य उद्भब: सञ्जात:।तेषु प्रस्थानेषु महामुनिना भरतेन कृतम् रस-प्रस्थानम् सर्बाग्रे उल्लिखितम्। अनन्तरं भामहेन कृतम् अलंकार-प्रस्थानम्, बामनेन् कृतम् रीति-प्रस्थानम् प्रमुखानि उल्लेखानि। सर्बसाकुल्ये अलंकारशास्त्रे सप्त-प्रस्थानि उपलभ्यन्ते।एषु प्रस्थानेषु रीति-प्रस्थानम् अलंकार-शास्त्रे गुरुत्बपूर्ण-स्थानम् अधिकृतम्। रीति: श्ब्दस्य ब्युतपत्तिग्त्: अर्थ: '**रियन्ते परम्परया गछन्ति अनया इति रीति':।** 'रीङ गतौ' बा 'रीङ स्रबणे' धातौ क्तिन् प्रत्ययेन योगेन बैदर्भी आदि मार्गस्य अर्थ: निष्पद्यते। बलदेबाचार्य-उपध्यायेन मतम् यत् रीङ+क्तिन्=रीति:। अथ रीति: शब्द्स्य् अर्थ: मार्ग:।

**2. रीते: उद्भब: बिकासश्चेति-**

रीतेरुद्भब्: एबं विकासबिषये न केबलं अलंकारग्रन्थानां प्रामाण्यम् अपि तु बेद: एबास्ति।ऋग्बेदे रीतिशब्दस्य प्रयोग: कतिपयेषु स्थानेषु भबत्।तद्यथा- **महीबरीति: शबसासरत् पृथक्।(ऋ.बे.सं २/२८/१४)।**गमनार्थक् रीङ्-धातो: निष्पन्न: रीते: शब्द्स्य अर्थ: न केबलं मार्गार्थे अपि तु गमनार्थे प्रयुक्तबान्- **तामस्य रीति-परशोरिब।(ऋ.बे.सं ५/४८/४)।**सायणाचार्येन मतम् रीतेरर्थ्: स्बभाब: गतिश्च इति। यद्यपि बेदे प्रयुक्त: रीते: अर्थ: अलंकारशास्त्रे ब्यबह्रत: रीते: न सादृश्यम् बर्तते। अनन्तरं भरतमुनिना कृतम् नाट्यशास्त्रेन् निर्देशितम् पथम् मार्गम् इति बिबेच्यते अलंकारग्रन्थेषु। बुत्पत्तिगतार्थेन माध्यमेन् काब्यशास्त्रीयानाम् मार्गस्य सम्बन्धित: चतुर्बिभाग: कृतम्। यथा प्रथमत: प्रदेशेन् आधारितम् बिभाजितम् काब्यमार्गम्, द्बितीयत: रचनाशैली अर्थात् काब्यतत्बेन आधारितम् काब्यमार्गम्, तृतीयत: कबिस्बभाबेन आधारितम् काब्यमार्गम्, चतुर्थत: काब्यचिन्तनेन माध्यमेन आधारितम् काब्यमार्गम् च।

**3. रीते: लक्षणम् :** सर्बार्गे भरतमुनिना रीते: अर्थ: प्रबृत्ते: सम्बन्ध: स्पष्टत: नानादेशै: अथबा भूभागै: रुपेन बिचार्यम्।अनन्तरम् भामहेन भरतमतमिब घोषितम् अश्मकादि देशबिशेषेण सह बैदर्भमार्गस्य सम्बन्धंमात्रम्।रीतिमतस्य प्रमुखप्रतिपादक: प्रधानाचार्य: बामन:।बामनेन् न् केबलम् रीते: स्रष्टा अपि तु आत्मारुपेण उदघोषितम्-**रीतिरात्मा काब्यस्य(का.लं.सू १/२/६)।** बामनेन मतम् **बिशिष्टापदरचना रीति:( का.लं.सू १/२/७)।** इयमेब अर्थ: शैलीबिशेष:।अत: प्रश्न सञ्जात: यत् किं बिशेष:? अस्मिन् बिषये बामनार्य: आह् यत् बिशेषो गुणात्मा। अर्थात् रीति: गुणोपरि निर्भरशील:। बिश्बनाथेन् मतम् रीते: लक्षणम् यत् पदसंघटनाबिशेष:[१]।

**4. प्रदेशेन् बिभाजितम् काब्यमार्गम् :** प्रदेशेन आधारितम् काब्यमार्गम् अनुसरणकारीषु आलंकारिकेषु भरतमुनि: अग्रगन्यम्। सर्बार्गे भरतमुनिना रीते: अर्थ: प्रबृत्ते: सम्बन्धं स्पष्टत: नानादेशै: अथबा भूभागै: बेशभूषणै: च बिचार्यम्। भरतमुनिना चतुर्बिधम् मार्गम् भूभागै: दृष्टम्। यथा, आबन्ती-दाक्षिनात्य-पाञ्चाल(मध्यमा)-औड्रमागधीश्चेति-

**चतुर्बिधा: प्रबृत्तिश्च प्रोक्ता नाट्य प्रयोगत:।**

**आबन्ती दाक्षिनात्य च पाञ्चाली चोड्रमागधी॥ ना.शा, १३/३७।**

भरतम् अनन्तरं आचार्येन दण्डिना भरतमिब देशभेदेन काब्यमार्गं बिभाजितम्। आचार्येन दण्डिना देशभेदेन द्बिर्बिधम् काब्यमार्गं प्रदर्शितम्। यथा, बैदर्भी: गौडीश्चेति—

**अस्त्यनेको गिरां मार्ग: सूक्ष्मभेद: परस्परम्।**

**तत्र बैदर्भगौडीयौ बर्ण्येते प्रस्फुटान्तरौ॥ का.द, १/४०।**

आचार्येन दण्डिना बामनाचार्यमिब रीते: गुणोपरिस्थिति: स्बीक्रीयतम्। दशगुणा: बैदर्भीमार्गस्य प्राणस्बरुपा:[२]।राजशेखेन पदानाम् समस्तता-असमस्ततयो: एब अधारोपरि रीतानाम् बिचार: अन्यप्रकारेणैब कृतमस्ति। बचनबिन्यासक्रममेब रीति: प्रदर्शयन्[३]। बचनबिन्यासभेदे तथा उच्चारभेदे रीते: ब्यबहारोपि कृतम्[४]।राजशेखरेन चर्तुबिध: रीते: ब्यबहार: प्रद्रशितम्, किन्तु त्रयरीति:[५] मुख्य- **रीतयस्तु तिस्रस्तासु पुरस्तात्।** भोजराजस्तु देशभेदामेबाश्रित्य रीतानां षाड्बिध्यं प्रतिपायामास[६] यथा, बैदर्भी-गौडी-पाञ्चाली-लाटी-श्राबन्ती-मागधीश्चेति।

**5. रचनाशैली अर्थात् काब्यतत्बेन आधारितम् काब्यमार्गम् :** भामहस्तु अश्मकादि देशभेदेन् बैदर्भादि मार्गस्य सम्बन्धमनुचितमेब घोषितबान्। भामहेन मतम् रीति: द्बिबिधम्। यथा बैदर्भी,गौडी। नाममात्रेन बस्तो: उतकृष्ट-अपकृष्टता बिचार्यम् अनुचितमेब, गुणमात्रेण बिचार्यम् आबश्यकम् इति। अग्निपुराणकारेण मतम् रीतेराधार: समास:। पुराणकार: चत्बार: रीति: स्बीकृयते। यथा बैदर्भी, गौडी, पाञ्चाली लाटीश्च[७]। रुद्रटेन मतम् रीते: मूल: समास:।समासेन बिभाजितम्

रीति: द्विबिधम् यथा समासबती असमासबतीश्च। समासबते: अन्तर्गत: पाञ्चाली-लाटी-गौडी: अपरं तु बैदर्भी: असमासबते: अन्तर्गतश्च।

**6. कबिस्वभाबेन आधारितम् काब्यमार्गम् :** कुन्तकस्य भाबनायाम् मार्ग: कबिभाबनाबिशिष्ट:। कबिस्वभाबतौ मार्गस्य त्रयभेदा: सन्ति, यथा सुकुमार: बिचित्र: मध्यमश्चेति[८]।कुन्तकेन मतम् सुकुमारमार्गस्य कबि: महाकबि: कालिदास:। अत: नाममात्रेन प्रभेदम्, सुकुमारमार्गम् बामनेन मतम् बैदर्भीमार्गम् इति।

**7. काब्यचिन्तनेन आधारितम् काब्यमार्गम् :** रीते: उद्भबबिकासश्च बैदिकयुगात् किन्तु स्पष्टता तथा सहजसाध्यता बामनेन कृतम्। बामनेन् कृतम् मार्गम् बामनीय मार्गम् इति उच्यते।बामनेन् न् केबलम् रीते: स्रष्टा अपि तु आत्मारुपेण उदघोषितम्- **रीतिरात्मा काब्यस्य(का.लं.सू १/२/६)।** बामनेन मतम् **बिशिष्टापदरचना रीति:( का.लं.सू १/२/७)।** इयमेब अर्थ: शैलीबिशेष:। अत: प्रश्न सञ्जात: यत् किं बिशेष:? अस्मिन् बिषये बामनार्य: आह् यत् बिशेषो गुणात्मा। अर्थात् रीति: गुणोपरि निर्भरशील:। बामनेन मतम् रीति: त्रिबिध: यथा बैदर्भी: गौडी: पाञ्चालीश्चेति- समस्तगुणोपता बैदर्भी (का.लं.सू,१/२/११), ओजकान्तिमती गौडीया(का.लं.सू,१/२/१२), माधुर्यसौकुमार्योपपन्ना पाञ्चाली (का.लं.सू,१/२/१३)।

एतद्पि उद्भटेन् कृतम् मार्गम् बिशेषउल्लेखयोग्यम्। उद्भटाचार्येन् कृतम् मार्गम् औदभटीयमार्गम् इति उच्यते।ध्बनिकार: आनन्दबर्धन्: रीतये सञ्घटनारुपशब्दप्रयोग: कृतबान्। आनन्दबर्धनेन कथितम् संघटनम् अर्थात् पदानां रसानुकुलां रचनां प्रति इति[९]। आनन्दबर्धनेन मतम् माधुर्यादि गुणोपरि आश्रितो भूत्बा रसाभिब्यक्तं पक्रिया संघटना। असमासा-मध्यम-समासा-दीर्घसमासाश्चेति नाम्ना त्रिधा भबति[१०]। रीतिप्रसंगे आनन्दबर्धनस्य काब्यतत्त्बस्य उपरि प्रबोचत् यत् रीतिं प्रति ध्बने: घनिष्टता-

अस्फुटं स्फुरितं काब्यतत्त्बमेतत् यथोदितम्।

अशक्नुबद्भिर्ब्याकर्त्तुं रीतय: सम्प्रबर्त्तिता:॥ ध्बन्यालोक, ३/४७।

मम्मटार्यास्तु माधुर्यादिगुणानाम् भेदबशत: रीतिनाम् भेद: कृतबान्। अपरं तु मम्मटेन मतम् पदानाम् समस्तता-असमस्ततयोपरि बैदर्भादि रीतिनाम् चतुर्बिधानां रीतिनाम् रचना भबति। आचार्य: बिश्बनाथ: रीतिनाम् चतुर्बिभाग: कृतबान्। अत: रचना उपरि रीतिनाम् प्रभाब: बर्तते।

## 8. संकेतसूची :

**ऋ.बे.सं- ऋग्बेद् संहिता, का.लं.सू- काब्यालंकारसूत्रबृत्ति:।**

**ना.शा- नाट्यशास्त्रम्, का.द्- काब्यादर्श:, अ.पु- अग्निपुराणम्।**

**सा.द- सहित्यदर्पणम्, का.मी-काब्यमीमांसा, ब.जी- बक्रोक्तिजीबितम्।**

## 9. तथ्यसूत्राणि :

१.पदसंघटनारीतिरंगसंस्था बिशेषबत्, उपकर्त्री रसादीनाम्।(सा.द,९/१)।

२. श्लेष: प्रसाद: समता माधुर्यं सुकुमारता।

अर्थब्यक्तिरुदारत्ब-मोज:कान्तिसमाधय:॥ का.द्, १/४१।

इति बैदर्भमार्गस्य प्राणा दशगुणा: स्मृता:।

एषां बिपर्यय: प्रायो दृश्यते गौडबर्त्मनि॥ का.द, १/४२।

३. बचनबिन्यासक्रम: रीति:। का.मी, तृतीयाध्याय:

४.तथाबिधा कल्पनाहपि तया यद् अबंशबदीकृत: समासबदनुप्रासबद् योगबृत्तिपरम्परागर्भ जगाद् सा गौडीया रीति:।तथाबिधा कल्पनाहपि तथा यदीष-द्बशंबदीकृत: ईषदसमासम्, ईषदनुप्रासमुपचारगर्भञ्च जगाद् सा पाञ्चालीरीति:। का.मी

५. बैदर्भी-गौडीया-पाञ्चाली चेति रीतयस्त्रिस्र:।

आसु च साक्षान्निबसति सरस्बती तेन लक्ष्यन्ते॥ का.मी

६. बैदर्भी साथ पाञ्चाली गौडीयाबन्तिका तथा।

लाटीया मागधी चेति षोढा रीतिर्निगद्यते॥ सरस्बतीकण्ठाभरणं, २/५२

७. बाग्बिद्यासंप्रतिज्ञाने रीति: साहपि चतुर्बिधा।

पाञ्चाली गौडदेशीया बैदर्भी लाटजा तथा॥ अ.पु, ३०४/१

८. सम्प्रति तत्र ये मार्गा: कबिप्रस्थानहेतब:।

सुकुमारो बिचित्रश्च मध्यमश्चोभयात्मक:॥ ब.जी,१/२४

९. गुणानाश्रित्य तिष्ठन्ति माधुर्यादीन् ब्यनक्ति सा रसान्...... ध्बन्यालोक्

१०. असमासा समासेन मध्यमेन च भूषिता।

तथा दीर्घ समासेति त्रिधा संघटनोदिता। ध्बन्यालोक,३/५

## सहायकग्रन्थानि :

१.गोप: युधिष्ठिर:, संस्कृतसाहित्येर इतिहास, संस्कृतबुकडिपो, कलिकाता, १९९०।
२.च्याटार्जी एन्ड च्याटार्जी, काब्यादर्श ओब दण्डीन्, डाब्लु.बि.पुस्तकपरिषद, कोलकाता-१९९५।
३.दाशगुप्त: एस.एन, हिस्टरि ओब संस्कृत लिटिरिचार, इउनिभारसिटि ओब क्यालकाटा, १९६२।
४.लाहिरि.पि.सि, कनसेप्ट् ओब रीति एन्ड गुना, संस्कृतपुस्तकभाण्डार, कोलकाता-१९६०, ढाका-१९३७।
५.बसु: अनिलचन्द्र:, काब्यालंकारसूत्रबृत्ति:, संस्कृतबुकडिपो, कोलकाता, २००१।
६.बन्द्योपाध्याय: अशोककुमार:, आदर्शसंकृतपाठमालासुरभि:, संस्कृतबुकडिपो, कलिकाता-६,२००२।
७.ब्यानार्जी: सुरेशचन्द्र:, भरतनाट्यशास्त्रम्, नबपत्रप्रकाशनम्, कोलकाता, १९९७।
८.बिद्यानिधि: गुरुनाथ:, साहित्यदर्पणम्, संस्कृतपुस्तकभाण्डार:, कोलकाता, २०००।
९.भौमिक: जाह्नबीचरण्: संस्कृतसाहित्यस्य इतिहास:, संस्कृतबुकडिपो, कलिकाता-६, २००२।